संस्कृत-वार्ता:

09.05.2024

सायम् - 06:20

मुख्यवार्ता:

· लोकसभा-निर्वाचनस्य चतुर्थचरणाय शेषेभ्यश्च चरणेभ्य: नैर्वाचनिक प्रचाराभियानं तीव्रं जातम्।

· रक्षासचिव: गिरिधर-अरमाने सबलं प्रत्यपादयत् यत् रक्षाक्षेत्रे आधारभूत-संरचनागत-विकासाय देशाय आत्मनिर्भरता महत्वपूर्णा वर्तते।

· एयरइण्डिया-एक्सप्रेस इत्यनया विमानसेवया स्व-वरिष्ठचालकदलस्य पञ्चविंशति: सदस्यानां सेवा निरस्तीकृता।

· केन्द्रीय-अन्वेषण-अभिकरणेन दिल्ल्या: राम-मनोहर-लोहिया-चिकित्सालये चिकित्सकीय-प्रवञ्चनां उद्घाटयन् चिकित्सक द्वयं समेत्य एकादशजना: निगडिता:।

· आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य धर्मशालायां पञ्जाबकिंग्सदलस्य प्रतिस्पर्धा रॉयल-चैलेन्जर्स- बेंगलुरू-दलेन सह भविष्यति।

प्रचारभियानम्

लोकसभा-निर्वाचनस्य चतुर्थचरणाय शेषेभ्यश्च चरणेभ्य: नैर्वाचनिक प्रचाराभियानं तीव्रं जातम्। विविध-राजनीतिक-दलीया: नेतार: जनसभा: मार्गीयप्रदर्शनानि च विदधति। चतुर्थचरणस्य मतदानम् अस्य मासस्य त्रयोदशदिनांके षण्णवति: च आसनेभ्य: दशसु राज्येषु एकस्मिन् केन्द्रशासितप्रदेशे च भविष्यति। सप्तदशाधिक-सप्तदशशतं प्रत्याशिनां भाग्यनिर्णय: अपि अस्मिन्नेव चरणे सम्भाव्यते। चतुर्थचरणीय मतदानम् अवलोक्य प्रख्यातनेतार: निजप्रत्याशि समर्थने मतदानाय आह्वानं कुर्वन्ति। भाजपेतिदलस्य वरिष्ठ: नेता अमितशाह: अद्य भोंगिर-लोकसभा-क्षेत्रं प्रति यास्यति। तत्रासौ दलप्रत्याशिन: डॉ. बूरा-नरसैया-गौडस्य समर्थनाय प्रचारं करिष्यति। तत्रैव कांग्रेसदलनेता राहुलगांधी अपि अद्य तेलंगानाराजये प्रचाराभियाने एकस्मिन् भागं भजिष्यति अपि च हैदराबादनगरस्य बाह्यक्षेत्रे सरूरनगरे एकं सार्वजनिक-उपवेशनं सम्बोधयिष्यति। बी.आर.एस्. प्रमुख: तेलंगानाया: पूर्वमुख्यमन्त्री के.चन्द्रशेखरराव: अपि मार्गीयप्रदर्शनं विधास्यति।

## रक्षानुसन्धान संघटनम्

रक्षासचिव: गिरिधर-अरमाने सबलं प्रत्यपादयत् यत् रक्षाक्षेत्रे आधारभूत-संरचनागत-विकासाय आत्मनिर्भरता महत्वपूर्णा वर्तते। तेनोक्तं यत् देश: अस्मिन् क्षेत्रे पराश्रित: नैव भवितुं शक्यते। अद्य नवदिल्ल्यां रक्षानुसन्धान-विकास-संघटनस्य राष्ट्रिय-संगोष्ठ्या: प्रदर्शन्याश्च औद्घाटनिक सत्रं सम्बोधयन् असौ अकथयत् यत् आत्मनिर्भरता उद्घोषमात्रं नैव अपितु देशस्य आर्थिक-विकासस्य महत्वपूर्णसत्रं वर्तते। आत्म-निर्भरतया संरचनागत-विकासाय मूल्यराशि: अल्पो भविष्यति। यूक्रेनदेशाय अमेरिकादेशस्य विलम्बेन प्राप्तस्य साहाय्यस्य उद्धरणं प्रदत्त्वा श्रीअरमाने: प्रोक्तवान् यत् विश्वस्य भूराजनीत्यां कमपि विश्वसनीयमित्रं नास्ति अपि च देश: निराश्रितो भवेदिति। असौ अत्रावसरे रक्षा-क्षेत्राय नवाचार-उन्नत-प्रौद्योगिक्या निर्मित-उपकरणानाम् आवश्यकतां अपि कथितवान्।

## एयरइण्डिया सेवाबाधिता

एयरइण्डिया एक्सप्रेस इत्यनया विमानसेवया स्व-वरिष्ठचालकदलस्य पञ्चविंशति: सदस्यानां सेवा निरस्तीकृता। पूर्वसूचनाया: आभावेन एतेषां सदस्यानां अवकाशगमनेन एयरइण्डिया-एक्सप्रेस-विमान-सेवा: प्रभाविता: जाता:। येन हि साम्प्रतं यावत् अशीति: उड्डयनसेवा: बाधिता: जाता:। अद्यापि पञ्चाशीति: उड्डयनानि निरस्तीकृतानि। अनेन कारणेन प्रभाविता: यात्रिण: प्रतिदानं स्वीकरिष्यन्ति। उत वा अग्रिमतिथये यात्राविवरणं पुन: सुनिश्चित करिष्यन्ति। अनया विमानसेवया प्रोदीरितं यत् सम्प्रति अद्य सहयोगिन्य: एयरइण्डिया सेवाया: साहाय्येन विंशति: यात्रागतमार्गेषु त्र्यशीत्यधिक-द्विशतं उड्डयनानां सञ्चानं करिष्यति।

## केन्द्रीयान्वेषण-अभिकरणम्

केन्द्रीय-अन्वेषण-अभिकरणेन दिल्ल्या: राम-मनोहर-लोहिया-चिकित्सालये चिकित्सकीय-प्रवञ्चनां उद्घाटयन् चिकित्सक द्वयं समेत्य एकादशजना: निगडिता:। एतेषु निगडित-जनेषु चिकित्सकीय-उपकरणानां आपूर्तिकर्तृभि: मूल्यप्रदानस्य पञ्जीकरण-सौविध्य-प्रदानस्य रोगिभ्य: अवैधरीत्या राशिग्रहणस्य अनुचित-चिकित्सकीय-प्रमाण-पत्र-निर्माणस्य च आरोपा: वर्तन्ते।

## कश्मीरप्रदेशीय प्रवास:

निर्वाचनायोगेन लोकसभा-निर्वाचनस्य मतदानाय दिल्ल्यां निवसन्तेभ्य: कश्मीरप्रदेशीय-प्रवासिभ्य: राष्ट्रियराजधान्यां विभिन्नेषु स्थानेषु विशिष्टानि मतदातृकेन्द्राणि संस्थापितानि।

एतानि केन्द्राणि कश्मीर-रेजिडेंट-कमीशन इत्यत्र कश्मीर-किसान-घर-बीआरटू शालीमारबाग इत्यत्र अर्वाचिन-इंटरनेशनल-पब्लिक-स्कूल-पॉकेट-एफ-दिलशादगार्डन इत्यत्रापि अथ च अनेकेषु स्थलेषु संस्थापितानि।

## लोकसभा-निर्वाचन -छठा चरण

अद्य लोकसभा-निर्वाचनस्य षष्ठचरणस्य नामांकन प्रत्यावर्तनस्य अन्तिम: दिवसो वर्तते। अस्मिन् चरणे मई-मासस्य पञ्चविंशति: दिनांके षड् राज्येषु एक: केन्द्रशासितप्रदेशे च सप्तपञ्चाशत् आसनेभ्य: मतदानं भविष्यति। षष्ठचरणे दिल्लीनगरस्य सर्वेषु सप्त-आसनेषु, हरियाणा-राज्यस्य दश आसनेषु, उत्तर-प्रदेशस्य चतुर्दश आसनेषु, बिहार-पश्चिम-बंगाल-राज्ययो: अष्ट-आसनेषु, ओडिशा-राज्यस्य षड् आसनेषु झारखण्ड-राज्यस्य चतुर्षु आसनेषु च मतदानं भविष्यति। लोकसभा-निर्वाचनस्य मतगणना जून-मासस्य चतुर्थे दिनांके भविष्यति।

## बांग्लादेश-विदेशसचिव यात्रा

भारतस्य विदेशसचिव: विनय-मोहन-क्वात्रा अद्य प्रात: ढाकानगरे बांग्लादेशस्य प्रधानमन्त्रिणा शेखहसीना इत्यनया सह एकम् उपवेशनं विहितवान्। अत्रावसरे बांग्लादेशस्य विदेशमन्त्रिणा हसनमहमूदेन सहापि मेलनं कृतवान्। अवधेयं वर्तते यत् भारतीय: विदेश-सचिव: श्रीक्वात्रा बांग्लादेशस्य द्विदिवसीय-आधिकारिक-यात्रायाम् अस्ति। असौ बुधवासरे सायंकाले ढाका नगरं सम्प्राप्तवान्। अद्य एष: स्वकीयेन बांग्लादेशीयेन समकक्षेण मसूद-बिन-मोमेन-इत्यनेन सह उपवेशनं करिष्यति। उपवेशनावधौ राजनीतिकसुरक्षा-जल-व्यापार-निवेश-विद्युतापूर्ति-रक्षा-इत्यादिषु विषयेषु चर्चा भविष्यतीति।

## आई.पी.एल्

आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य धर्मशालाया पञ्जाबकिंग्सदलस्य प्रतिस्पर्धा रॉयल-चैलेन्जर्स- बेंगलुरू-दलेन सह भविष्यति। ह्य: रात्रौ हैदराबादनगरे जातायां स्पर्धायां सनराइजर्स-हैदराबाददलं लखनऊ-सुपर-जायन्ळस दलं दश क्रीडकै: पराजितवत्।

।। इति वार्ता: ।।